# *॥ નવગ્રહસૂક્તમ ॥*

ૐ શુક્લાંબરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજમ ।
પ્રસન્ન વદનં ધ્યાયેત સર્વ વિઘ્ન ઉપશાંતયે ॥

ૐ ભૂ: ૐ ભુવ: ૐ સુવ: ૐ મહ: ૐ જન: ૐ તપ: ૐ સત્યમ । ૐ તત્સવિતુર્વરેણ્યં ભર્ગોદેવસ્ય ધીમહિ । ધિયો યો ન: પ્રચોદયાત । ૐ આપો જ્યોતીરસોટમૃતં બ્રહ્મ ભૂર્ભુવસ્સુવરોમ ॥

મમોપાત્ત સમસ્ત દુરિતક્ષયદ્વારા શ્રીપરમેશ્વર પ્રીત્યર્થં આદિત્યાદિ નવગ્રહદેવતા પ્રસાદ સિદ્ધ્યર્થં આદિત્યાદિ નવગ્રહ નમસ્કારાન કરિષ્યે ॥

ૐ આસત્યેન રજસા વર્તમાનો નિવેશયન્નમૃતં મર્ત્યંચ । હિરણ્યયેન સવિતા રથેનાટટદેવો યાતિભુવના વિપશ્યન । અગ્નિં દૂતં વૃણીમહે હોતારં વિશ્વવેદસમ । અસ્ય યજ્ઞસ્ય સુક્રતુમ । યેષામીશે પશુપતિ: પશૂનાં ચત્ષ્પદામુત ચ દ્વિપદામ । નિષ્ક્રીતોટયં યજ્ઞિયં ભાગમેતુ રાયસ્પોષા યજમાનસ્ય સન્તુ ॥
ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતાય આદિત્યાય નમ: ॥ ૧ ॥

ૐ આપ્યાયસ્વ સમેતુ તે વિશ્વતસ્સોમ વૃષ્ણિયમ । ભવા વાજસ્ય સંગથે । અપ્સુમે સોમો અબ્રવીદન્તર્વિશ્વાનિ ભેષજા । અગ્નિંચ વિશ્વશંભુવમાપશ્ચ વિશ્વભેષજી: । ગૌરી મિમાય સલિલાનિ તક્ષત્યેકપદી દ્વિપદી સા ચતુષ્પદી । અષ્ટાપદી નવપદી બભૂવુષી સહસ્રાક્ષરા પરમે વ્યોમન ॥
ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતાય સોમાય નમ: ॥ ૨ ॥

ૐ અગ્નિમૂર્દ્ધા દિવ: કકુત્પતિ: પૃથિવ્યા અયમ । અપાગંરેતાગંસિ જિન્વતિ । સ્યોના પૃથિવિ ભવાટનૃક્ષરા નિવેશની । યચ્છાનશ્શર્મ સપ્રથા: । ક્ષેત્રસ્ય પતિના વયગંહિતે નેવ જયામસિ । ગામશ્વં પોષયિત્વા સ નો મૃડાતીદૃશે ॥
ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતાય અઙ્ગારકાય નમ: ॥ ૩ ॥

ૐ ઉદ્બુધ્યસ્વાગ્ને પ્રતિજાગૃહ્યેનં ઈષ્ટાપૂર્તે સગંસૃજેથામયંચ । પુન: કૃણ્વગ્ગસ્ત્વા પિતરં યુવાનમન્વાતાગંસીત્ત્વયિ તન્તુમેતમ । ઈદં વિષ્ણુ–ર્વિચક્રમે ત્રેધા નિદધે પદમ । સમૂઢમસ્યપાગં સુરે । વિષ્ણો રરાટમસિ વિષ્ણો: પૃષ્ઠમસિ વિષ્ણોશ્શ્નપ્ત્રેસ્થો વિષ્ણોસ્સ્યૂરસિ વિષ્ણોર્ધ્રુવમસિ વૈષ્ણવનસિ વિષ્નવે ત્વા ॥
ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતાય બુધાય નમ: ॥ ૪ ॥

ૐ બૃહસ્પતે અતિયદર્યો અર્હાદ્દ્યુમદ્વિભાતિ ક્રતુમજ્જનેષુ । યદ્દીદયચ્ચ વસર્તપ્રજાત તદસ્માસુ દ્રવિણન્ધેહિ ચિત્રમ । ઈન્દ્રમરુત્વ ઈહ પાહિ સોમં યથા શાર્યાતે અપિબસ્સુતસ્ય । તવ પ્રણીતી તવ

શૂરશર્મન્નાવિવાસન્તિ કવચસ્સુચન્ના: । બ્રહ્મજજ્ઞાનં પ્રથમં પુરસ્તાદ્વિસીમતસ્સુરુચો વેન આવ: ।
સબુધ્નિયા ઉપમા અસ્ય વિષ્ઠાસ્સતશ્ચ યોનિમસતશ્ચ વિવ: ॥
ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતાય બૃહસ્પતયે નમ: ॥ ૫ ॥

ૐ પ્રવશ્શુક્રાય ભાનવે ભરધ્વમ । હવ્યં મતિં ચાગ્નયે સુપૂતમ । યો દૈવ્યાનિ માનુષા જનૂંગંષિ ।
અન્તર્વિશ્વાનિ વિદ્મ ના જિગાતિ । ઈન્દ્રાણીમસુ નારિષુ સુપત્નીં અહમશ્રવમ । ન હ્યસ્યા અપરંચન
જરસા મરતે પતિ: । ઈન્દ્રં વો વિશ્વતસ્પરિહવામહે જનેભ્ય: । અસ્માકમસ્તુ કેવલ: ॥
ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતાય શુક્રાય નમ: ॥ ૬ ॥

ૐ શન્નો દેવીરભિષ્ટય આપો ભવન્તુ પીતયે । શંયોરભિસ્રવન્તુ ન: । પ્રજાપતે ન ત્વદેતાન્યન્યો
વિશ્વા જાતાનિ પરિતા બભૂવ । યત્કામાસ્તે જુહુમસ્તન્નો અસ્તુ વયગ્ગસ્યામ પતયો રયીણામ । ઈમં
યમપ્રસ્તરમાહિ સીદાટઙ્ગિરોભિ: પિતૃભિસ્સંવિદાન: । આત્વા મન્ત્રા: કવિશસ્તા વહન્ત્વેના રાજન,
હવિષા માદયસ્વ ॥
ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતાય શનૈશ્ચરાય નમ: ॥ ૭ ॥

ૐ કયા નશ્ચિત્ર આભુવદૂતી સદાવૃધસ્સખા । કયા શચિષ્ઠયા વૃતા । આટયઙ્ગૌ:
પૃશ્નિરક્રમીદસનન્માતરં પુન: । પિતરઞ્ચ પ્રયન્ત્સુવ: । યતે દેવી નિર ઋતિરાબન્ઢ દામ
ગ્રીવાસ્વવિચર્ત્યમ । ઈદન્તે તદ્વિષ્યામ્યાયુષો ન મધ્યાદથાજીવ: પિતુમદ્ધિ પ્રમુક્ત: ॥
ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતાય રાહવે નમ: ॥ ૮ ॥

ૐ કેતુઙ્કૃણ્વન્નકેતવે પેશો મર્યા અપેશસે । સમુષદ્ભિરજાયથા: । બ્રહ્મા દેવાનાં પદવી: કવીનામ
ઋષિર વિપ્રાણાં મહિષો મૃગાણામ । શ્યેનો ગૃધ્રાણાગ સ્વધિતિર્વનાનાગં સોમ: પવિત્રમત્યેતિ રેભન ।
સચિત્ર ચિત્રં ચિતયન્તમસ્મે ચિત્રક્ષત્ર ચિત્રતમં વયોધામ । ચન્દ્રં રયિં પુરુવીરં બૃહન્તં
ચન્દ્રચન્દ્રાભિર્ગૃણતે યુવસ્વ ॥
ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતાય કેતુભ્યો નમ: ॥ ૯ ॥

॥ ૐ આદિત્યાદિ નવગ્રહ દેવતાભ્યો નમો નમ: ॥

॥ ૐ શાન્તિ: શાંતિ: શાન્તિ: ॥